# શ્રીવિષ્ણુસ્તુતિઃ (કવિસૂક્તિભ્યઃસઙ્કુલિતા)

shrIviShNustutiH (kavisUktibhyaHsankalitA)

sanskritdocuments.org

May 12, 2018

# shrIviShNustutiH (kavisUktibhyaHsankalitA)

# શ્રીવિષ્ણુસ્તુતિઃ (કવિસૂક્તિભ્યઃસઙ્કલિતા)

## Sanskrit Document Information


Text title : viShNustutiHkavisUkti

File name : viShNustutiHkavisUkti.itx

Category : vishhnu

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : April 12, 2018

Send corrections to : sanskrit@cheerful.com



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


May 12, 2018

*sanskritdocuments.org*

shrIviShNustutiH (kavisUktibhyaHsankalitA)

# શ્રીવિષ્ણુસ્તુતિઃ (કવિસૂક્તિભ્યઃસઙ્કુલિતા)

નમસ્ત્રિભુવનોત્પત્તિસ્થિતિસંહારહેતવે ।
વિષ્ણવેઽપારસંસારપારોત્તરણસેતવે ॥ ૧॥

આદિમધ્યાન્તરહિતં દશાર્હાનં પુરાતનમ્ ।
અદ્વિતીયમહં વન્દે મદ્વસ્ત્રસદૃશં હરિમ્ ॥ ૨॥

લક્ષ્મીકપોલસઙ્ક્રાન્તકાન્તપત્રલતોજ્જ્વલાઃ ।
દોર્દ્રુમાઃપાન્તુ વઃ શૌરેર્ઘનચ્છાયામહાફલાઃ ॥ ૩
જયતિ સ ભગવાન્કૃષ્ણઃ શેતે યઃ શેષભોગશય્યાયામ્ ।
મધ્યેપયઃ પયોધેરપર ઇવામ્ભોનિધિઃ કૃષ્ણઃ ॥ ૪॥

અતિવિપુલં કુચયુગલં રહસિ કરૈરામૃશન્મુહુર્લક્ષ્મ્યાઃ ।
તદપહૃતં નિજહૃદયં જયતિ હરિર્મૃગયમાણ ઇવ ॥ ૫॥

જયતિ સ નાભિર્જગતાં સ્વનાભિપદ્મોદ્ભવજ્જગદ્બીજઃ ।
દોમોદરો નિજોદરગહ્વરનિર્વિષ્ટજગદણ્ડઃ ॥ ૬॥

શ્રીકરપિહિતં ચક્ષુઃ સુખયતુ વઃ પુણ્ડરીકનયનસ્ય ।
જઘનમિવેક્ષિતુમાગતમબ્જનિભં નાભિસુષિરેણ ॥ ૭॥

શ્યામં શ્રીકુચકુઙ્કુમપિઞ્જરિતમુરો મુરદ્વિષો જયતિ ।
દિનમુખનભ ઇવ કૌસ્તુભવિભાકરો યદ્વિભૂષયતિ ॥ ૮॥

પ્રતિબિમ્બિતપ્રિયાતનુ સકૌસ્તુભં જયતિ મધુભિદો વક્ષઃ ।
પુરુષાયિતમભ્યસ્યતિ લક્ષ્મીર્યદ્વીક્ષ્ય મુકુરમિવ ॥ ૯॥

કેલિચલાઙ્ગુલિલમ્ભિતલક્ષ્મીનાભિર્મુરદ્વિષશ્ચરણઃ ।
સ જયતિ યેન કૃતા શ્રીરનુરૂપા પદ્મનાભસ્ય ॥ ૧૦
રોમાવલી મુરારેઃ શ્રીવત્સનિવેશિતાગ્રભાગા વઃ ।
ઉન્નાલનાભિનલિનચ્છાયેવોત્તાપમપહરતુ ॥ ૧૧॥

કમલાકુચકનકાચલજલધરમાભીરસુન્દરીમદનમ્ ।
અધિતતશેષફણાવલિ(સુ)કમલવનભૃઙ્ગમચ્યુતં વન્દે ॥ ૧૨॥

જીયાદમ્બુધિતનયાધરરસમાસ્વાદયન્મુરારિરયમ્ ।
અમ્બુધિમથનક્લેશં કલયન્વિફલં ચ સફલં ચ ॥ ૧૩॥

શ્રીધામ્નિ દુગ્ધોદધિપુણ્ડરીકે યશ્ચઞ્ચરીકદ્યુતિમાતનોતિ ।
નીલોત્પલશ્યામલદેહકાન્તિઃ સ વોઽસ્તુ ભૂત્યૈ ભગવાન્મુકુન્દઃ ॥ ૧૪॥

વક્ષઃસ્થલી રક્ષતુ સા જગન્તિ જગત્પ્રસૂતેર્ગરુડધ્વજસ્ય ।
શ્રિયોઽઙ્ગરાગેણ વિભાવ્યતે યા સૌભાગ્યહેમ્નઃ કષપટ્ટિકેવ ॥ ૧૫॥

વૃન્દારકા યસ્ય ભવન્તિ ભૃઙ્ગા મન્દાકિની યન્મકરન્દબિન્દુઃ ।
તવારવિન્દાક્ષ પદારવિન્દં વન્દે ચતુર્વર્ગચતુષ્પદં તત્ ॥ ૧૬॥

જયત્યુપેન્દ્રઃ સ ચકાર દૂરતો વિભિત્સયા યઃ ક્ષણલબ્ધલક્ષ્યયા ।
દૃશૈવ કોપારુણયા રિપોરુરઃ સ્વયં ભયાદ્ભિન્નમિવાસ્રપાટલમ્ ॥ ૧૭॥

પદ્માપયોધરતટીપરિરમ્ભલગ્નકાશ્મીરમુદ્રિતમુરો મધુસૂદનસ્ય ।
વ્યક્તાનુરાગમિવ ખેલદનઙ્ગખેદસ્વેદામ્બુપૂરમનુપૂરયતુ પ્રિયં વઃ ॥ ૧૮॥

શ્રેયઃ સદા દિશતુ સાલસપક્ષ્મપાતે
નિદ્રાયિતેઽપિદૃશૌ ભૃશમુન્નમય્ય ।
સંવાહ્યમાનચરણામ્બુજજાતહર્ષો
લક્ષ્મીમુખેક્ષણપરઃ પરમેશ્વરો વઃ ॥ ૧૯॥

સકલભુવનબન્ધોર્વૈરમિન્દોઃ સરોજૈઃ
અનુચિતમિતિ મત્વા યઃ સ્વપાદારવિન્દમ્ ।
ઘટયિતુમિવ માયી યોજયત્યાનનેન્દૌ
વટદલપુટશાયી મઙ્ગલં વઃ કૃષીષ્ટ ॥ ૨૦॥

વરવકુચચુબુકાગ્રે પાણિષુ વ્યાપૃતેષુ
પ્રથમજલધિપુત્રીસઙ્ગમેઽનઙ્ગધામ્નિ ।
ગ્રથિતનિબિડનીવીવન્ધનિર્મોચનાર્થં
ચતુરધિકકરાશઃ પાતુવશ્ચક્રપાણિઃ ॥ ૨૧॥

વિરમતિ મહાકલ્પે નાભીપથૈકનિકેતનઃ
ત્રિભુવનપુરઃશિલ્પી યસ્ય પ્રતિક્ષણમાત્મભૂઃ ।
કિમધિકરણં કીદૃક્કસ્યવ્યવસ્થિતિરિત્યસૌ

ઉદરમવિશદ્દ્રષ્ટું તસ્મૈ જગન્નિધયે નમઃ ॥ ૨૨॥

લક્ષ્મીપાણિદ્વયવિરચિતં મૂલમૂર્ધશ્રુતીનાં
વ્યક્તં વન્દે ચરણકમલદ્વન્દ્વમાદ્યસ્ય પુંસઃ ।
યત્રૈકસ્ય વ્યધિત બલિના પાદ્યતોયૈર્વિતીર્ણૈઃ
આદ્રસ્યૈવ પ્રણતિતરલઃ ક્ષાલનં પદ્મયોનિઃ ॥ ૨૩॥

અનાદૃતચમૂપતિપ્રહિતહસ્તમસ્વીકૃત
પ્રણીતમણિપાદુકં કિમિતિ વિસ્મિતાન્તઃપુરમ્ ।
અવાહનપરિષ્ક્રિયં પતગરાજમારોહતઃ
કરિપ્રવરબૃંહિતે ભગવતસ્ત્વરાયૈ નમઃ ॥ ૨૪॥

દૃક્પાતઃ કમલાસનેઽ સ્તુ ભવતો જ્ઞાનં મનાઙ્મારુતે
શ્રીકણ્ઠોઽયમિતઃ સુરાનિતિ નતાસ્તાર્ક્ષ્યેણ વિજ્ઞાપિતઃ ।
પ્રેયસ્યાઃ ક્વ તદાસનં ક્વ ચ રુતં કણ્ઠઃ ક ચેત્યુલ્લસત્
લક્ષ્મ્યાવાસિતમાનસો વિજયતે સુપ્તપ્રબુદ્ધો હરિઃ ॥ ૨૫॥

નિર્મગ્નેન મયામ્ભસિ સ્મરભરાદાલિઃ સમાલિઙ્ગિતા
કેનાલીકમિદં તવાદ્ય કથિતં રાધે મુધા તામ્યસિ ।
ઇત્યુત્સ્વપ્નપરમ્પરાસુ શયને શ્રુત્વા વચઃ શાર્ઙ્ગિણઃ
સવ્યાજં શિથિલીકૃતઃ કમલયા કણ્ઠગ્રહઃ પાતુ વઃ ॥ ૨૬॥

યં શૈવાઃ સમુપાસતે શિવ ઇતિ બ્રહ્મેતિ વેદાન્તિનો
બૌદ્ધા બુદ્ધ ઇતિ પ્રમાણપટવઃ કર્તેતિ નૈયાયિકાઃ ।
અર્હન્નિત્યથ જૈનશાસનરતાઃ કર્મેતિ મીમાંસકાઃ
સોઽયં વો વિદધાતુ વાઞ્છિતફલં ત્રૈલોક્યનાથો હરિઃ ॥ ૨૭॥

યેનોત્થાપ્ય સમૂલમન્દરગિરિશ્છત્રીકૃતો ગોકુલે
રાહુર્યેન મહાબલઃ સુરરિપુઃ કાર્યાદશેષીકૃતઃ ।
કૃત્વા ત્રીણિ પદાનિ યેન વસુધા બદ્ધો બલિર્લીલયા
સોઽયં પાતુ યુગે યુગે યુગપતિસ્ત્રૈલોક્યનાથો હરિઃ ॥ ૨૮॥

મુગ્ધે મુઞ્ચ વિષાદમત્ર બલભિત્કમ્પો ગુરુસ્ત્યજ્યતાં
સદ્ભાવં ભજ પુણ્ડરીકનયને માન્યાનિમાન્માનય ।
ઇત્થં શિક્ષયતઃ સ્વયંવરવિધૌ ધન્વન્તરેર્વાક્છલાત્
અન્યત્ર પ્રતિષેધમાત્મનિ વિધિં શૃણ્વન્હરિઃ પાતુ વઃ ॥ ૨૯॥

નાભીપદ્મવસચ્ચતુર્મુખમુખોદ્ગીતસ્તવાકર્ણન-
પ્રોન્મીલત્કમનીયલોચનકલાખેલન્મુખેન્દુદ્યુતિઃ ।
સક્રોધં મધુકૈટભૌ સકરુણસ્નેહં સુતામમ્બુધેઃ
સોત્પ્રાસપ્રણયં સરોજવસતિં પશ્યન્હરિઃ પાતુ વઃ ॥ ૩૦॥

નિષ્પ્રત્યૂહમુપાસ્મહે ભગવતઃ કૌમોદકીલક્ષ્મણઃ
કોકપ્રીતિચકોરપારણપટુજ્યોતિષ્મતી લોચને ।
યાભ્યામર્ધવિબોધમુગ્ધમધુરશ્રીરર્ધનિદ્રાયિતો
નાભીપલ્વલપુણ્ડરીકમુકુલઃ કમ્બોઃ સપત્નીકૃતા ॥ ૩૧॥

ભક્તિપ્રહ્વવિલોકનપ્રણયિની નીલોત્પલસ્પર્ધિની
ધ્યાનાલમ્બનતાં સમાધિનિરતૈર્નીતે હિતપ્રાપ્તયે ।
લાવણ્યૈકમહાનિધી રસિકતાં લક્ષ્મીદૃશોસ્તન્વતી
યુષ્માકં કુરુતાં ભવાર્તિશમનં નેત્રે તનુર્વા હરેઃ ॥ ૩૨॥

ચત્વારઃ પ્રથયન્તુ વિદ્રુમલતારક્તાઙ્ગુલિશ્રેણયઃ
શ્રેયઃ શોણસરોજકોરકરુચસ્તે શાર્ઙ્ગિણઃ પાણયઃ ।
ભાલેષ્વબ્જભુવો લિખન્તિ યુગપદ્યે પુણ્યવર્ણાવલીઃ
કસ્તૂરીમકરીઃ પયોધરયુગે ગણ્ડદ્વયે ચ શ્રિયઃ ॥ ૩૩॥

આકલ્પં મુરજિન્મુખેન્દુમધુરોન્મીલન્મરુન્માધુરી
ધીરોદાત્તમનોહરઃ સુખયતુ ત્વાં પાઞ્ચજન્યધ્વનિઃ ।
લીલાલઙ્ઘિતમેઘનાદવિભવો યઃ કુમ્ભકર્ણવ્યથા-
દાયી દાનવદન્તિનાં દશમુખં દિક્ચક્રમાક્રામતિ ॥ ૩૪॥

ભ્રામ્યન્મન્દરકન્દરોદરદરીવ્યાવર્તિભિર્વારિધેઃ
કલ્લોલૈરલમાકુલં કલયતો લક્ષ્યા મુખામ્ભોરુહમ્ ।
ઔત્સુક્યાત્તરલાઃ સ્મરાદ્વિકસિતા ભીત્યા સમાકુઞ્ચિતાઃ
ક્રોધેન જ્વલિતા મુદા મુકુલિતાઃ શૌરેર્દૃશઃ પાન્તુ વઃ ॥ ૩૫॥

પર્યઙ્કીકૃતનાગનાયકફણાશ્રેણીમણીનાં ગણે
સઙ્ક્રાન્તપ્રતિબિમ્બસંવલનયા બિભ્રદ્વપુર્વિક્રિયામ્ ।
પાદામ્ભોરુહધારિવારિધિસુતામક્ષ્ણાં દિદૃક્ષુઃ શતૈઃ
કાયવ્યૂહમિવાચરન્નુપચિતાકૂતો હરિઃ પાતુ વઃ ॥ ૩૬॥

મન્થક્ષ્માધરઘૂર્ણિતાર્ણવપયઃ પૂરાન્તરાલોલ્લસત્
લક્ષ્મીકન્દલકોમલાઙ્ગદલનપ્રાદુર્ભવત્સમ્ભ્રમાઃ ।

હર્ષોત્કણ્ટકિતત્વચો મધુરિપોર્દેવાસુરાકર્ષણ-
વ્યાપારોપરમાય પાન્તુ જગતીમાબદ્ધવીપ્સા ગિરઃ ॥ ૩૭॥

ચક્ર બ્રૂહિ વિભો ગદે જય હરે કમ્બો સમાજ્ઞાપય
ભો ભો નન્દક જીવ પન્નગરિપો કિં નાથ ભિન્નો મયા ।
કો દૈત્યઃ કતમો હિરણ્યકશિપુઃ સત્યં ભવદ્ભ્યઃ શપે
કેનાસ્ત્રેણ નખૈરિતિ પ્રવદતો વિષ્ણોર્મુખં પાતુ વઃ ॥ ૩૮॥

પ્રત્યગ્રોન્મેષજિહ્મા ક્ષણમનભિમુખી રત્નદીપપ્રભાણાં
આત્મવ્યાપારગુર્વી જનિતજલલવાજૃમ્ભિતૈઃ સાઙ્ગભઙ્ગૈઃ ।
નાગાઙ્ગં ભોક્તુમિચ્છોઃ શયનમુરુફણાચક્રવાલોપધાનં
નિદ્રાચ્છેદાભિતામ્રા ચિરમવતુ હરેર્દૃષ્ટિરાકેકરા વઃ ॥ ૩૯॥

શ્રીરાજીવાક્ષવક્ષઃસ્થલનિલયરમાહસ્તવાસ્તવ્યલોલત્
લીલાબ્જાન્નિઃસરન્તી મધુરમધુઝરી નાભિપદ્મે મુરારેઃ ।
અસ્તોકં લોકમાત્રા દ્વિયુગમુરવશિશોરાનનેષ્વર્પ્યમાણં
શઙ્ખપ્રાન્તેન દિવ્યં પય ઇતિ વિબુધૈઃ શઙ્કમાના પુનાતુ ॥ ૪૦॥

કિઞ્ચિન્નિર્મુચ્યમાને ગગન ઇવ મુખે શાઠ્યનિદ્રાપયોદૈઃ
ન્યક્કુર્વાણે સ્વભાસા ફણિપતિશિરસાં રત્નદીપાંશુજાલમ્ ।
પાયાસ્તાં વો મુરારેઃ શશિતપનમયે લોચને યદ્વિભાસા
લક્ષ્મ્યા હસ્તસ્થમર્ધં વિકસતિ કમલસ્યાર્ધમભ્યેતિ નિદ્રામ્ ॥ ૪૧॥

એકસ્થં જીવિતેશે ત્વયિ સકલજગત્સારમાલોકયામઃ
શ્યામે ચક્ષુસ્તવાસ્મિન્વપુષિ નિવિશતે નાલ્પપુણ્યસ્ય પુંસઃ ।
કસ્યાન્યત્રામૃતેઽસ્મિન્નતિરતિવિપુલા દૃષ્ટિરેવામૃતં તે
દૈત્યૈરિત્યુચ્યમાનો મુનિભિરપિ હરિઃ સ્ત્રૈણરૂપોઽવતાદ્વઃ ॥ ૪૨॥

યસ્યોદ્યદ્બાણબાહુદ્રુમગહનવનચ્છેદગોષ્ઠીકુઠારં
ચક્રં નિષ્ક્રાન્તતીવ્રાનલબહલકણાકીર્ણધારં વિચિન્ત્ય ।
જાતગ્રાસાવસાયો દિવસકૃતિલસન્માંસલાંશુપ્રવાહે
મુહ્યત્યદ્યાપિ રાહુઃ સ દહતુ દુરિતાન્યાશુ દૈત્યાન્તકો વઃ ॥ ૪૩॥

ત્રિંશત્કોટિવસુરુદ્રદિવાકરાદિ-
દેવાદિદેવગણસન્તતસેવ્યમાનમ્ ।
અમ્ભોજસમ્ભવચતુર્મુખગીયમાનં
વન્દે શયાનમિહ ભોગિનિ શાર્ઙ્ગપાણિમ્ ॥ ૪૪॥

લક્ષ્મીર્યસ્ય પરિગ્રહઃ કમલભૂ સૂનુઃ ગરુત્માન્ રથઃ
પૌત્રશ્ચન્દ્રવિભૂષણઃ સુરગુરુઃ શેષશ્ચ શય્યાઽઽસનઃ ।
બ્રહ્માણ્ડં વરમન્દિરં સુરગણા યસ્ય પ્રભોઃ સેવકાઃ
સ ત્રૈલોક્યકુટુમ્બપાલનપરઃ કુર્યાત્સદા મઙ્ગલમ્ ॥ ૪૫॥

ઇતિ કવિસૂક્તિભ્યઃ સઙ્કલિતા શ્રીવિષ્ણુસ્તુતિઃ સમાપ્તા ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

---

*shrIviShNustutiH (kavisUktibhyaHsankalitA)*

pdf was typeset on May 12, 2018

Please send corrections to *sanskrit@cheerful.com*